श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये चतुर्थं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये चतुर्थं दशकम् ॥

## अष्टाङ्गयोगवर्णनं योगसिद्धिवर्णनं च

कल्यतां मम कुरुष्व तावतीं
    कल्यते भवदुपासनं यया।
स्पष्टमष्टविधयोगचर्यया
    पुष्टयाशु तव तुष्टिमाप्नुयाम् ॥ 4.1 ॥

ब्रह्मचर्यदृढतादिभिर्यमै -
    राप्लवादिनियमैश्च पाविताः।
कुर्महे दृढममी सुखासनं
    पङ्कजाद्यमपि वा भवत्पराः ॥ 4.2 ॥

तारमन्तरनुचिन्त्य सन्ततं
    प्राणवायुमभियम्य निर्मलाः।
इन्द्रियाणि विषयादथापहृ -
    त्यास्महे भवदुपासनोन्मुखाः ॥ 4.3 ॥

अस्फुटे वपुषि ते प्रयत्नतो
    धारयेम धिषणां मुहुर्मुहुः।
तेन भक्तिरसमन्तरार्द्रता -
    मुद्वहेम भवदङ्घ्रिचिन्तकाः ॥ 4.4 ॥

विस्फुटावयवभेदसुन्दरं
    त्वद्वपुस्सुचिरशीलनावशात्।

अश्रमं मनसि चिन्तयामहे
ध्यानयोगनिरतास्त्वदाश्रयाः ॥ **4.5** ॥

ध्यायतां सकलमूर्तिमीदृशी -
मुन्मिषन्मधुरताहृतात्मनाम्।
सान्द्रमोदरसरूपमान्तरं
ब्रह्मरूपमयि तेऽवभासते ॥ **4.6** ॥

तत्समास्वदनरूपिणीं स्थितिं
त्वत्समाधिमयि विश्वनायक।
आश्रिताः पुनरतः परिच्युता -
वारभेमहि च धारणादिकम् ॥ **4.7** ॥

इत्थमभ्यसननिर्भरोल्लस -
त्त्वत्परात्मसुखकल्पितोत्सवाः।
मुक्तभक्तकुलमौलितां गताः
सञ्चरेम शुकनारदादिवत् ॥ **4.8** ॥

त्वत्समाधिविजये तु यः पुन -
र्मङ्क्षु मोक्षरसिकः क्रमेण वा।
योगवश्यमनिलं षडाश्रयै -
रुन्नयत्यज सुषुम्नया शनैः ॥ **4.9** ॥

लिङ्गदेहमपि संत्यजन्नथो
लीयते त्वयि परे निराग्रहः।
ऊर्ध्वलोककुतुकी तु मूर्धतः
सार्धमेव करणैर्निरीयते ॥ **4.10** ॥

अग्निवासरवलर्क्षपक्षगै -
रुत्तरायणजुषा च दैवतैः।

प्रापितो रविपदं भवत्परो
    मोदवान् ध्रुवपदान्तमीयते ॥ **4.11** ॥

आस्थितोऽथ महरालये यदा
    शेषवक्त्रदहनोष्मणार्द्यते।
ईयते भवदुपाश्रयस्तदा
    वेधसः पदमतः पुरैव वा ॥ **4.12** ॥

तत्र वा तव पदेऽथवा वसन्
    प्राकृतप्रलय एति मुक्तताम्।
स्वेच्छया खलु पुरा विमुच्यते
    संविभिद्य जगदण्डमोजसा ॥ **4.13** ॥

तस्य च क्षितिपयोमहोऽनिल -
    द्योमहत्प्रकृतिसप्तकावृतीः।
तत्तदात्मकतया विशन् सुखी
    याति ते पदमनावृतं विभो ॥ **4.14** ॥

अर्चिरादिगतिमीदृशीं व्रजन्
    विच्युतिं न भजते जगत्पते।
सच्चिदात्मक भवद्गुणोदया -
    नुच्चरन्तमनिलेश पाहि माम् ॥ **4.15** ॥

॥ इति श्रीमन्नारायणीये चतुर्थ दशकं समाप्तम् ॥